Reprint from the Journal of the Travancore University Oriental Manuscripts Library

No. 14

LĪLĀVATĪVĪTHĪ

OF

RĀMAPĀṆIVĀDA

PUBLISHED BY

THE UNIVERSITY MANUSCRIPTS LIBRARY

TRIVANDRUM.

TRIVANDRUM :

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,


1948.

Price Annas Eight.

LĪLĀVATĪVĪ'THĪ

OF

RĀMAPĀṆIVĀDA



PUBLISHED BY

THE UNIVERSITY MANUSCRIPTS LIBRARY,
TRIVANDRUM.

TRIVANDRUM :

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1948.

INTRODUCTION

The *Līlāvatī* of Rāmapāṇivāda[1] is a work belonging to the type of drama called *vīthī*, which, though it forms one of the ten major varieties of Sanskrit drama, has but very few known representatives. The author has himself written another *vīthī* by name *Candrikā*[2] in which he gives the characteristics of this type of drama in the verse :

पात्रद्वयप्रयोज्या भाणवदेकाङ्किका द्विसन्धिश्च ।
आकाशभाषितवती कृत्रिममितिवृत्तमाश्रिता वीथी ॥

e., a *vīthī* is an one-Act drama with an artificial plot, having two characters, two junctures (*mukha* and *nirvahaṇa*) and abounding in *ākāśabhāṣitas*. The *Daśarūpaka* gives two more characteristics, namely the *kaiśikīvṛtti* and *Śṛṅgārarasa*. cf:

वीथी तु कैशिकीवृत्तौ सन्ध्यङ्गाङ्कैस्तु भाणवत् ।
रसः सूच्यस्तु शृङ्गारः स्पृशेदपि रसान्तरम् ॥

(*Daśarūpaka III. 68, 69*)

All these characteristics are well exemplified in the *Līlāvatī*.

The king of Karṇāṭa, fearing the abduction of his daughter Līlāvati by his enemies, places her under the care of Kalāvati, the wife of king Vīrapāla of Kuntala. Kalāvati keeps her out of the sight of the king fearing the possibility of the development of a love affair between them. They, however, happen to meet and fall in love with each other. Vaihāsika, the boon companion of the king, comes to know of this and arranges with a Yoginī by name Siddhimati to bring about their union by magical means. But, unable to bear the separation from Vīrapāla,

1. For an account of the life and works of Rāmapāṇivāda *vide* Introduction to *Mukundaśataka* in Vol. II. No. 2. of this Journal.
2. Published by Prof. K. Rama Pisharoti in the *Bulletin of the Rama Varma Research Institute* No. 3, Trichur. (1934)

Līlāvti sends a love letter to him along with the signet of her ivory ear-ring, which is, unfortunately, discovered by the attendant maid of the queen, who thus comes to know of this. In the meantime, the magical art of Siddhimati begins to work, by which a cobra is made to appear on the spot and bite Kalāvati, who however later on revives at the approach of Vaihāsika, disguised, according to previous arrangement, as a snake-charmer named Bhadrasiddhi. Bhadrasiddhi is offered a present, but he refuses it saying that he would receive it in due time and disappears. The king and queen meet, but Kalāvati would not forgive him. She only torments him by asking her maid to read out Līlāvati's love-letter. But the art of Siddhimati works further. That night the queen is made to see in a dream Lord Śiva appear before her and tell her that it was he who, in the guise of Bhadrasiddhi, saved her from the snake, and, as a reward for it, she should marry Līlāvati to Vīrapāla, as this alliance would elevate him to the position of an emperor. She agrees and the next morning narrates to the king her dream, and asks him to take the hand of Līlāvati. On the day of the marriage, when Līlāvati is going for worship in the temple, she is caught by the demon Tāmrākṣa, sent by the king of Kaliṅga, the enemy of her father. Vīrapāla fights with him and kills him. The marriage is then celebrated with due pomp and splendour. In the end, Vaihāsika informs the king of the stratagem by which the hand of Līlāvati was procured for him. This is the plot of the play.

The play has three divisions. The Āmukha is in the form of a dialogue between the Sūtradhāra and Naṭī, and mentions the author Rāmapāṇivāda, his patron Devanārāyaṇa and his uncle Rāghavapāṇivāda and indicates the time to be the rainy season. The Viṣkambha is mostly a dialogue between Vaihāsika and Kelimalā, the queen's maid, the speeches of the latter being all *ākāśabhāṣitas*. In the drama proper Vīrapāla and Vaihāsika are the only charac-

ters that appear on the stage and the speeches of the other characters are heard from behind the scenes.

The two Sandhis, *mukha* and *nirvahaṇa*, are well represented, the first ending with the king's meeting with the queen after the cobra incident.

The dominant sentiment is love, *Śṛṅgāra*, the main element in the drama being the love affair between Līlāvati and Vīrapāla, and this is well depicted. But in keeping with the rule **प्रधानेऽपि रसान्तरम्** the author has also depicted as subordinate rasas *adbhuta* in the stratagem of Siddhimati, *bhayānaka* in the cobra incident, *vīra* in the Tāmrākṣa episode and *hāsya* in the Vidūṣaka's disguise and his speeches.

The author has chosen a simple and elegant style as being the most appropriate for the main sentiment *śṛṅgāra*. There is a marked absence of long compounds, and the expressions are direct. The descriptions of the rainy season and of the condition of the separated lovers are beautiful. The author has presented the play in such a manner that all the incidents appear quite natural and they possess a dramatic vigour. The drama may well be called a model *vīthī*.

The present edition is based on Ms. No. 958A of the Curator's collections in this Library, procured from Narayanan Narayanan Elayathu, Vempanattillam, Ampalapuzha, N. Travancore. It is legibly written in Malayalam script and is generally free from mistakes.

॥ श्रीः ॥

रामपाणिवादविरचिता

लीलावती वीथी ।

तत्पादपद्मयुगलं गिरिकन्यकाया
लोकातिशायिचरितं भवतः पुनातु ।
उल्लासयन्ति यदिदं मुहुरीश्वरस्य
चूडानिशाकरकिशोरमयूखलेखाः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः — आज्ञापितोऽस्मि निखिलशास्त्रपुराणनाटकप्रपञ्चसततपरिशीलनविशदान्तरात्मनो नित्यसन्निदधदम्बरधुनीनाथपरिचरणपरायणस्य महाराजदेवनारायणस्य पादपद्मोपजीविना महीसुरसमाजेन । यथा — "भो रङ्गदीप!—

अभिनवपदबन्धबन्धुरार्था-
मभिनय कामपि वीथिकामुदाराम् ।
शुचिरसमधुराणि या बिभर्त्ति
प्रचुरविचित्रतराणि चेष्टितानि" ॥ २ ॥

इति । तद्यावद्गृहिणीमाहूय सङ्गीतक्रममनुतिष्ठामि । (परिक्रम्य नेपथ्याभिमुखमवलोक्य) आर्ये! इतस्तावत् ।

(प्रविश्य)

नटी — (क) अय्य इअम्हि ।

(क) आर्य! इयमस्मि ।

तदेहि। यथानैपुणमाज्ञानुष्ठानेन परिषदाराधयावः।

नटी — (सविमर्शं शंसं) (क) अय्य! किं पि पुच्छिदुं इच्छामि।

सूत्रधारः — पृच्छ विस्रब्धम्।

नटी — (ख) मह बहिणिआए रङ्गमल्लिआए दुहिआ रङ्गळच्छी णाम चंपाणअरवासिणा सङ्गीदमल्लणामहेएण णट्टएण केच्चिरं विअ पथीअदि। तहिं पुण से पुठमगिहिणीए रङ्गमाळाए असूआभारो अन्तराओ। अवि णाम दाणीं एदे महाबह्मणा ताणं अण्णोण्णसंघडणरूव्वं वरं पडिवज्जिस्सन्ति।

सूत्रधारः — आर्ये। कः सन्देहः। पश्य —

रहयति महामोहग्रन्थिं धिनोति मनोऽधिकं
जनयति पुनः कार्ये कार्ये परिश्रमलाघवम्।
वितरति शरज्ज्योत्स्नाशुभ्रं यशश्च निरङ्कुशं
किमु न कुरुते नृणामेतन्महाजनपूजनम्॥ ९॥

(नेपथ्ये)

(ग) साहु भरहकुमार! साहु।
जहिट्ठमट्ठारहवेअवेदी
चउप्पुराणोअहिपारगामि।
वेहासिओ णाम महीसुरोऽहं
ण पूइओ कस्स घडेमि कज्जम्॥ १०॥

(क) आर्य! किमपि प्रष्टुमिच्छामि।

(ख) मम भगिन्या रङ्गमल्लिकाया दुहिता रङ्गलक्ष्मीर्नाम चम्पानगरवासिना सङ्गीतमल्लनामधेयेन नर्तकेन कियच्चिरमिव प्रार्थ्यते। तस्मिन् पुनरस्य प्रथमगृहिण्या रङ्गमालाया असूयाभारोऽन्तरायः। अपि नामेदानीमेते महाब्राह्मणा तयोरन्योन्यसङ्घटनरूपं मे वरं प्रतिपादयिष्यन्ति।

(ग) साधु भरतकुमार! साधु।
यथेष्टमष्टादशवेदवेदी चतुष्पुराणोदधिपारगामी।
वैहासिको नाम महीसुरोऽहं न पूजितः कस्य घटयामि कार्यम्॥

सूत्रधारः — आकर्ण्य तदनुसारेणावलोक्य सहर्षम्) आर्ये ! अयमत्रभवतः कुन्तलेश्वरस्य वीरबलस्य नर्मसचिवभूमिकां गृहीत्वा मम कनीयानिव एवाभिवर्त्तते । तदेह्यावामप्यनन्तरकरणीयाय सज्जीभवावः ।

(निष्क्रान्तौ ।)

आमुखम्

(ततः प्रविशति विदूषकः ।)

विदूषकः — (साहु भरहेत्यादि पठित्वा) (क) जदो खु अहं अज्ज पिअवअस्सस्स चिरन्तणदेवीए साहाविएसाकलुसिअमणाए कळावदीए वअस्सदंसणादो रक्खिज्जमाणं तवस्सिणिं लीळावदिं णाम कण्णअं तहिंतो दुग्घडादो मोइअ विग्गहुक्कण्ठिदेण पिअवअस्सेण सह संघडेदुं इच्छन्तो गच्छामि ।

(विचिन्त्य) (ख) सुविहिदं च मए एदं । जेण महप्पहावं सिद्धिमदिं णाम जोईसरिं एत्थ कज्जरहस्से णिक्खिवन्तेण लहूइदो मे भारो ।

(परिक्रम्यावलोक्य च) (ग) अए लीळावदीए पिअसही केळिमाळा इदो एव्व आअच्छदि । ताणं पुच्छिस्सं । हंहो केळिमाळे !

(क) यतः खल्वहमद्य प्रियवयस्यस्य चिरन्तनदेव्या स्वाभाविकेर्ष्याकलुषिततमनसा कलावत्या वयस्यदर्शनाद् रक्ष्यमाणां तपस्विनीं लीलावतीं नाम कन्यकां तस्माद् दुर्घटान्मोचयित्वा विग्रहोत्कण्ठितेन प्रियवयस्येन सह सङ्घटयितुमिच्छन् गच्छामि ।

(ख) सुविहितं च मयैतत् ! येन महाप्रभावां सिद्धिमतीं नाम योगीश्वरीमत्र कार्यरहस्ये निक्षिपता लघूकृतो मे भारः ।

(ग) अये लीलावत्याः प्रियसखी केलिमाला इत एवागच्छति । तदेनां प्रक्ष्यामि । हंहो केलिमाले ! कुत्र प्रस्थितासि । किं भणसि । प्रिय—

कहिं पत्थिदासि। किं भणासि—'पिअसहीए कज्जरहस्सं अन्तरेण अय्यं एव्व पेक्खिदुं' त्ति। (सगर्वं) को अण्णो मह महाबह्मणस्स समसीसं उव्वहइ रहस्सचिन्ताअं। ता भण विस्सद्धम्। किं भणासि—'अपि तुवं रहस्सं रक्खिदुं पारेसि' त्ति। (सरोषमिव) आः अविस्सम्भसीळे! भणाहि दाव। णहि वुदी एव्व खज्जइ सस्सं। किं भणासि—'ता सुणाहि दाव। (संस्कृतमाश्रित्य)

न स्नाने न च भोजने न शयने धत्ते मनागादरं
नादत्ते करणीयवस्तुघटनायत्तं सखीनां वचः।
पर्यङ्कं विरहय्य पल्लवमयीं शय्यां सदा सेवते
कष्टं सम्प्रति वीरपालविरहाल्लीलावती दूयते' ॥ ११ ॥

(क) तदो तदो।

'श्रयति गरुच्छायं भूयः पयोधरमण्डली-
विवरगलितानिन्दोः पादानसौ विरलानपि।
कथमपि पुरोज्जातानेतान् विकस्वरकेतकी-
परिमलभृतो दावासेवं सखी मम सेवते' ॥ १२ ॥

इति।

(विमृश्य स्वगतम्) (ख) अहो अदिभूमिं गदो तवस्सिणीए अणुराओ। (प्रकाशं) ता पिअवअस्सस्स दसन्तरं वि किंपि सुणाहि दाव। (संस्कृतमाश्रित्य)

विकचकुटजमल्लीफुल्लनिर्यन्मधूली-
परिमलपरिवारे वाति सन्ध्यासमीरे।

सख्याः कार्यरहस्यमन्तरेणार्यमेव प्रेक्षितुमिति। कोऽन्यो मम महाब्राह्मणस्य समशीर्षमुद्वहति रहस्यचिन्तायाम्। तस्माद् भण विस्रब्धम्। किं भणसि! अपि त्वं रहस्यं रक्षितुं पारयसि इति। आः अविस्रम्भशीले! भण तावत्। नहि वृतिरेव खादयति सस्यम्। किं भणसि। तत् शृणु तावत्।

(क) ततस्ततः।

(ख) अहो अतिभूमिं गतस्तपस्विन्या अनुरागः। तत् प्रियवयस्यस्य दशान्तरमपि किमपि शृणु तावत्।

लुठति धरणिपृष्ठे दीर्घमुष्णञ्च भूयः
श्वसिति वहति मूर्छां तीव्रतापः सखा मे ॥ १३ ॥

(क) तदो तदो। किं भणासि—'तदो एदं च सहत्थलिहिअ मअणगाहासणाहं कुङ्कुमपङ्ककज्जलिअं अत्तणो दन्ततालङ्कं भट्टिणो दंसेदुं मम हत्थे समप्पिदम्। ता गह्णदु एदं अय्यो' त्ति। (गृहीत्वानुवाच्य उत्तरीयेणाच्छाद्य कक्षे निक्षिपन्) होदि! किंपि रहस्सं पुच्छामि। असाहारणरूपळावण्णा इअं कण्णआ लीळावदी कुदो एत्थ आणीदा। किं भणासि—'संखिविअ भणिस्सं

कण्णाडराओ रिपुमण्डळादो
कण्णापहारं परिसंकमाणो।
देवीसआसं दुहिअं णअन्तो
वड्ढापए सम्पइ वुड्ढसेवी' ॥ १४ ॥

(त्ति)। अहो अभिजादकुळप्पसूदं एदं कण्णारअणं। अहव दुद्धसाअरं उज्झिय कुदो ळच्छी उग्गच्छइ। ता सव्वं चिट्ठदु। को उण एदाणं संघडणोपाओ त्ति चिन्तीअदु। किं भणासि—'वेहासिअ! को उण दे कवडणाडअं ण जाणादि' त्ति।

(क) ततस्ततः। किं भणसि। तत एतच्च स्वहस्तलिखितमदनगाथासनाथं कुङ्कुमपङ्ककज्जलितमात्मनो दन्ततालङ्कं भर्त्रे दर्शयितुं मम हस्ते समर्पितम्। तद् गृहाणत्वेतदार्य इति। भवति! किमपि रहस्यं पृच्छामि। असाधारणरूपलावण्येयं कन्यका लीलावती कुतोऽत्रानीता। किं भणसि। संक्षिप्य भणिष्यामि।

कर्णाटराजो रिपुमण्डलात् कन्यापहारं परिशङ्कमानः।
देवीसकाशं दुहितरं नयन् वर्धयति सम्प्रति वृद्धसेवी ॥

इति। अहो अभिजातकुलप्रसूतमेतत् कन्यारत्नम्। अथवा दुग्धसागरमुज्झित्वा कुतो लक्ष्मीरुद्गच्छति। तत् सर्वं तिष्ठतु। कः पुनरेतयोः संघटनोपाय इति चिन्त्यताम्। किं भणसि। वैहासिक! कः पुनस्ते कपटनाटकं न जानातीति।

(स्वगतम्) (क) एदाए जाणिदो किल एसो मम जोईसरीए सह रहस्ससंविभाअवुत्तन्तो । ता एव्वं दाव । (प्रकाशम्) होदि ! अवि दिट्ठा तुए जोईसरी सिद्धिमदी । किं भणासि—'अह इं। अण्णं च संघडणोपाओ वि ताणं तीए दंसिदो'त्ति । अह कीरिसो । किं भणासि—'एव्वं विअ'त्ति।

(सहर्षम्) (ख) कहं इंदजालविज्जाअं पि कुसळिणी सिद्धिमदी। किं भणासि—'अह इं । ता तुवं तिस्से सहाअकम्मणि अणुऊळो होहि। देवीविरोहादो पअण्णसज्झं एदं कज्जं'त्ति । होदु, अमहिज्जमाण दही ण णवणीदं मुञ्चेदि । ता एस सज्जो होमि । किं भणासि—'एदं णो रहस्सभासणं भट्टिणो वि मा पआसेहि'त्ति । दिढहिअओ खु वेहासिअबम्हणो । ता जोईसरीं एव्व अणुवट्टदु होदी ।

(इति परिक्रम्य विचिन्त्य)

(ग) बाणा जस्स विसट्टचूदकळिआ जीआ अ भिंगावळी
मित्तं वा ससळंच्छणो रणचमूथट्टो तरट्टीअणो ।

(क) एतया ज्ञात इवैष मम योगीश्वर्या सह रहस्यसंविभागवृत्तान्तः । तदेवं तावत् । भवति! अपि दृष्टा त्वया योगीश्वरी सिद्धिमती । किं भणसि । अथ किम् । अन्यश्च संघटनोपायोऽपि तयोस्तया दर्शित इति । अथ कीदृशः । किं भणसि । एवमिवेति।

(ख) कथमिन्द्रजालविद्यायामपि कुशलिनी सिद्धिमती । किं भणसि । अथ किम् । तत् त्वं तस्याः सहायकर्मण्यनुकूलो भव । देवीविरोधात् प्रयत्नसाध्यमेतत्कार्यमिति । भवतु, अमथ्यमानं दधि न नवनीतं मुञ्चति । तस्मादेष सज्जो भवामि । किं भणसि । एतन्नो रहस्यभाषणं भर्त्रेऽपि मा प्रकाशयेति । दृढहृदयः खलु वैहासिकब्राह्मणः । तद् योगीश्वरीमेवानुवर्ततां भवती।

(ग) बाणा यस्य विकसितचूतकलिका ज्या च भृङ्गावली
मित्रं वा शशलाञ्छनो रणचमूसार्थो विदग्धस्त्रीजनः ।

सोऽयं संकरणेत्तपावअपुरोडासो वि पंचाउहो
धीराणं वि मणाइ णेइ ण खणा हंहो दसं केरिसिम् ॥ १५ ॥

(अग्रतोऽवलोक्य सहर्षावेगम्) (क) अए एसो पिअवअस्सो वरिसारत्तसमअसविसेसविअंभमाणं वम्महाअंकं विणोदेदुकामो निरन्तरपळवविअतरुळदाजाळं बालुज्जाणं बाहुप्पीळकळुसाए दिट्ठीए पुळोअअन्तो इदो एव्व आअच्छदि। (विमृश्य)

विरहदहणवेअढज्जमाणो
कुसुमसरासणबाणदूअमाणो।
कह णु किं(रिं)ळ सहेज्ज मे वअस्सो
विरहिविसूरअपाउसावळेवम् ॥ १६ ॥

(निष्क्रान्तः।)

विष्कम्भकः।

(ततः प्रविशति यथानिर्दिष्टो राजा।)

राजा — (सन्तापनाटितकेन)—

बाणान् संहर पञ्चबाण! मधुपज्यावल्लरीसंहितान्
मुञ्चामुं च शरासमैक्षवमहो व्यर्थस्तवायं श्रमः।

सोऽयं शङ्करनेत्रपावकपुरोडाशोऽपि पञ्चायुधो
धीराणामपि मनांसि नयति न क्षणाद्धंहो दशां कीदृशीम्॥

(क) अये एष प्रियवयस्यो वर्षारम्भसमयसविशेषविजृम्भमाणं मन्मथाङ्कं विनोदयितुकामो निरन्तरपल्लवितततरुलताजालं बालोद्यानं बाष्पोत्पीडकलुषया दृष्ट्या विलोकयन्नित एवागच्छति।

विरहदहनवेगदह्यमानः
कुसुमशरासनबाणदूयमानः।
कथं नु किल सहेत मे वयस्यो
विरहिवेदनाकरप्रावृडवलेपम्॥

केकाभिश्च शिखण्डिनामविरलश्च्योतत्परागोत्करै-
र्मालत्याः प्रसवैश्च केवलमयी दूयामहे यद्वयम् ॥ १७ ॥

अपि च —

एते नूतनकेतकीदलकलाश्लक्ष्णीकृधाराकिराः
स्निग्धेन्दीवरलीलनीरदघटासम्पर्कशीतोत्कराः ।
मन्दान्दोलितहूणवारतरुणीवेणीकलापस्रजः
पौरस्त्या मरुतो न कस्य रभसादुत्कण्ठयेयुर्मनः ॥ १८ ॥

(सविमर्शनिःश्वासम्) तदा खलु सन्तानोद्याने—

वेणीलतादरतिरोहितमुद्वहन्ती
वक्त्रं पयोदपरिवीतमिवेन्दुबिम्बम् ।
आवेपमानतनुरास्थित लज्जया मे
लीलावती प्रकटलोलतरैरपाङ्गैः ॥ १९ ॥

इदं च तन्मन्मथोपज्ञमनुस्मरामि । यतः—

मन्दवातविलुलीकृतपुष्पै-
रुत्तरीयमलघुस्तनलग्नम् ।
सम्भ्रमक्रमपरिक्षितदृष्टि-
र्यत्नतः करतलेन समाधात् ॥ २० ॥

(विचिन्त्य) भो कष्टम् !

मम रणरणिकामभूतपूर्वा-
मविरलमानसदाहमावहन्तीम् ।
क पुनरहमिमां निवेशयेय
कथमिह सोऽपि चिरायते वयस्यः ॥ २१ ॥

(प्रविश्य)

विदूषकः — (क) जेदु भवम् ।

राजा —

(अश्रुतिमभिनीय मम रणरणिकामित्यादि पठति ।)

(क) जयतु भवान् ।

विदूषकः — (स्वगतम्) (क) अहो महन्तो से अभिसङ्गो। (प्रकाशं, राजानं हस्तेन चालयन्) णं भणामि जेदु भवं त्ति ।

राजा— (दृष्ट्वा सहर्षं) अथ वैहासिकः । सखे! वैहासिक!

अपि खलु कुशलं मे नेत्रयोरायतानां
मपि च जघनभारे दूरविस्तारभाजाम् ।
कुचसरसिजयुग्मे चोन्नतानां घनानां
दशनवसनबिम्बे चारुणानामसूनाम् ॥ २२ ॥

विदूषकः — (ख) अह इं । किन्दु—

गहिरपओहरत्थणिए मन्थेरमोरमिहुणणिहुवणए ।
कहवि गमेइ वराई तुह पणयालंबणा दिअहे ॥ २३ ॥

राजा— (सानुशयम्) सा खलु मया—

नवकुवलयदामश्यामलैर्दृष्टिपातैः
कुटिलचटुलचिल्लीवल्लिविल्लैश्च ।
निजहृदयनिगूढक्रूरमारावलेपं
तदसु विमृदयन्ती मीलिता नोपगूढा ॥ २४ ॥

विदूषकः — (ग) एत्थ तुह सरलत्तणं एव्व अवरज्झदि ।

राजा — सखे! मा मैवम्। पश्य —

किमपि चपलं जानत्या मे सुखेन सखीमुखा-
दरुणिमगुणो देव्या नाद्यापि मुञ्चति लोचने ।
कुचकलशयोः कोपोद्दीप्तो न शाम्यति वेपथु-
र्गलतलगलद्बाष्पो रुन्धेतरां परुषाक्षरम् ॥ २५ ॥

(क) अहो महानस्याभिषङ्गः । भवतु भणामि जयतु भवानिति ।

(ख) अथ किम् । किन्तु ।
गभीरपयोधरस्तनितोन्मेषदुर्ललितमयूरमिथुननिर्भुवनान् ।
कथमपि गमयति वराकी तव प्रणयालम्बना दिवसान् ॥

(ग) अत्र तव सरलत्वमेवापराध्यति ।

विदूषकः — (क) भो वअस्स होदु एव्वम् । को सिप्पिभञ्जणभएण मुत्तावलिं उज्झदि ।

राजा — (सस्मितम्) सखे ! नेदमेवम् । पश्य —

आरूढप्रणया चिराय महितं देवीपदं बिभ्रता
नार्हत्यद्य कलावती मयि सखे वैराग्यमालम्बितुम् ।
चेतोवञ्चनचुञ्चुना तनुभुवा मद्यं प्रसादीकृता
बाला नीलसरोजलोलनयना लीलावती किं पुनः ॥ २६ ॥

तेन हि उभयकोट्यविरुद्ध एव यत्नः कर्तव्यः ।

विदूषकः — (ख) अळं विसादेण । कालेण देवी दे अणुऊला भविस्सिदि ।

(नेपथ्ये)

(ग) राअहंस ! मह पङ्कइणीए
दंसिऊण खणमप्पविळासम् ।
सम्पअं पुण घणुक्कळिअं मे
केवलं कुणसि जुत्तमिदं ते ॥ २७ ॥

राजा — (श्रुत्वा) सखे ! केयमन्यापदिष्टा । कस्याश्चित् कञ्चित् प्रति सन्देशगाथापद्धतिरिव श्रूयते ।

विदूषकः — (ससम्भ्रमं, दन्तैर्जिह्वामवष्टभ्य स्वगतम्) (घ) हद्धि मे पमादो । (उत्तरीयं परामृशन्) उत्तरिज्जदिढबद्धं पि तं दन्ततालङ्कं पब्भट्ठम् ।

(क) भो वयस्य ! भवत्वेवम् । कः शुक्तिभञ्जनभयेन मुक्तावलिमुज्झति ।

(ख) अलं विषादेन । कालेन देवी ते अनुकूला भविष्यति ।

(ग) राजहंस मम पङ्कजिन्या दर्शयित्वा क्षणमात्मविलासम् ।
साम्प्रतं पुनर्घनोत्कलिकां मे केवलं करोषि युक्तमिदं ते ॥

(घ) हा धिक् मे प्रमादः । उत्तरीयदृढबद्धमपि तद् दन्ततालङ्कं प्रभ्रष्टम् ।

राजा — किमस्वस्थ इव लक्ष्यसे । ननु विचारय केयं गाथेति ।

विदूषकः — (क) चिट्ठदु भवं । अहं जाणिअ आअच्छामि ।

(निष्क्रान्तः ।)

राजा — (सवितर्कम्)

गाथेयं मधुरपदप्रकल्पबन्धा
कस्या नु प्रणयिनमाकुलीकरोति ।
एनां यो निजविषयां विदन्नुदास्ते
तच्चेतो ननु कृतमश्मना विधात्रा ॥ २८ ॥

(प्रविश्य)

विदूषकः — (दृष्ट्वा) (ख) हन्त! एसा दासीए धीदा देवीए पिअसही कंदलिआ एदं गहिअ वाएदि । (उपसृत्य) कन्दलिए किं एदं ।

(नेपथ्ये)

(ग) वैहासिअ! तुमं कंपि सिलोअं अज्झावइस्सं । ता मह पादेसु पणामं करेहि ।

विदूषकः — (घ) आः कहं महाबम्हणो दासीए पादेसु पणामं करेदि । अह कुदो एदं आसादिअम् ।

(क) तिष्ठतु भवान्, अहं ज्ञात्वागच्छामि ।

(ख) हन्त! एषा दास्याः दुहिता देव्याः प्रियसखी कन्दलिकैतद् गृहीत्वा वाचयति । कन्दलिके! किमेतत् ।

(ग) वैहासिक! त्वां कमपि श्लोकमध्यापयिष्यामि । तस्मान्मम पादयोः प्रणामं कुरु ।

(घ) आः कथं महाब्राह्मणो दास्याः पादयोः प्रणामं करोति । अथ कुत एतदासादितम् ।

(नेपथ्ये)

(क) एत्थ उज्जाणे वम्मीअरन्भमुहट्ठिअं सप्पणिम्मोअं विअ घणपण्डुरं एदं दन्तताडङ्कं मए गहीदं । मण्णे उज्जाणळच्छीए सवणपासादो पब्भट्ठं त्ति ।

विदूषकः — (ख) ता मह देहु ऐदं, जेण दे किंपि अच्छरिअं दंसेमि ।

(नेपथ्ये)

(ग) वेहासिअ ! सव्वं मए जाणिदं तुह्माणं कवटणाटअं । एदं ळीळावदीए सहत्थळिहिअगाहापणाहं दन्तताडङ्कं पमादणिहिणो तुह हत्थादो पब्भट्ठं त्ति । ता गह दाव एदं, महाराअं च दंसेहि । पच्चा अवत्थाणुरूवं अणुहोह । अहं गमिस्सम् ।

विदूषकः — (सान्त्वनम्) (घ) पसीअ कन्दळिए पसीअ । एक्कं मह अवराहं मरिसेहि ।

(इति दन्तताटङ्कं गृहीत्वा राजानमुपसृत्यार्पयति ।)

राजा — (गृहीत्वा) सखे ! किमेतत् ।

(क) अत्रोद्याने वल्मीकरन्ध्रमुखास्थितं सर्पनिर्मोकमिव घनपाण्डुरमेतत् दन्तताटङ्कं मया गृहीतम् । मन्ये उद्यानलक्ष्म्याः श्रवणपाशात् प्रभ्रष्टमिति ।

(ख) तस्मान्मम देह्येतत् । येन ते किमप्याश्चर्यं दर्शयामि ।

(ग) वेहासिक ! सर्वं मया ज्ञातं युष्माकं कपटनाटकम् । एतल्लीलावत्याः स्वहस्तलिखितगाथासनाथं दन्तताटङ्कं प्रमादनिधेस्तव हस्तात् प्रभ्रष्टमिति । तस्माद् गृहाण त वदैतत् । महाराजं च दर्शय । पश्चादवस्थानुरूपमनुभवतम् । अहं गमिष्यामि ।

(घ) प्रसीद कन्दलिके ! प्रसीद । एकं ममापराधं मर्षय ।

(विदूषकः) — (कर्णौ) (क) एवं विअ।

राजा — (सहर्षम्)

हृदय स्वस्ति भवते परितापमपाकुरु।

(विचिन्त्य)

किन्तु कृतघ्निका देव्याः कोपं द्विगुणयिष्यति ॥ २९ ॥

विदूषकः — (विहस्य) (ख) भो वअस्स! अलं देवीगदाए चिन्ताए। पाएहि पिआसंदेसपीऊसं। को दुद्धण्हाणापाणसमए आरणालं चिन्तेदि।

राजा — (सस्मितम्) यद्वयस्याय रोचते।

(वाचयति राजहंसेत्यादि।)

विदूषकः — (ग) उवरि वाएहि।

राजा — (पुनर्वाचयति)

मम नयनयोरातिथ्यं ते यदा मधुरस्मितं
वदनकमलं दैवादासीत्तदाप्रभृति स्मरः।
कुसुमविशिखैर्दीनं चेतो दुनोति दिने दिने
भुवनशरणं भूत्वा श्रीमन्! किमेवमुपेक्षसे ॥ ३० ॥

राजा — सखे परवानस्मि। पश्य —

कालोऽयं खलु नीलकण्ठनटनाटोपप्रियंभावुकः
पान्थान्तःस्मरपाश्यतोहरतटिद्वल्लीसुखाकारकः।
देवी च प्रणयानुरोधविमुखी लीलावती चेदृशी
कामो वामतरः विधिश्च विषमो हा हन्त! का मे गतिः
॥ ३१ ॥

(क) एवमिव।

(ख) भो वयस्य! अलं देवीगतया चिन्तया। पायय प्रियासन्देश पीयूषम्। को दुग्धस्नानपानसमये आरनालं चिन्तयति।

(ग) उपरि वाचय।

(नेपथ्ये)

प्रथमः — सुखाय प्रावृडारम्भो भवतु देवस्य । अत्र हि —

टङ्कारो नु जिगीषतस्त्रिभुवनं चापस्य चेतोभुवो
हंसानां किमुत प्रयाणपटहध्वानो दिवं गच्छताम् ।
हुङ्कारो नु घनागमस्य वनितामानाङ्कुरश्रन्धनो
ज्ञातं भो दिवि नीलनीरदघटातारध्वनिर्जृम्भते ॥ ३२ ॥

अपि च —

दिगङ्गनास्तूढपयोधरासु य-
न्यलायि कान्तेन मयूखमालिना ।
निमज्जते वारिणि लज्जमानया
सुरोरुहिण्यां किमनेन हेतुना ॥ ३३ ॥

द्वितीयः —

घर्मक्लान्तपलाशपाण्डुरतनुर्मुग्धप्रसूनेक्षणा
च्योतन्नूतनवारिबाष्पकणिकासंसिच्यमानावनिः ।
पौरस्त्यैः पवनैरिवायततरं निःश्वासमुन्मुञ्चती
पश्येयं विरहातुरेव पुरतस्सन्तिष्ठते यूथिका ॥ ३४ ॥

अपि च —

चलत्कलापं गलनालनिर्गल-
त्कलध्वनि व्याकुलनेत्रतारकम् ।
मनोविनोदं वितनोतु तेऽधुना
मनोहरं देव ! शिखण्डिताण्डवम् ॥ ३५ ॥

विदूषकः — (स्वगतम्) (क) मण्णे दाणिं वन्दिभोआवळीहिं दिउणदरं उद्दीविहिइ से विरहग्गी । ता एव्वं दाव । (प्रकाशम्) भो वअस्स ! उवरि वि वाएहि ।

(क) मन्ये इदानीं वन्दिभोगावलिभिर्द्विगुणतरमुद्दीप्यतेऽस्य विरहाग्निः । तस्मादेवं तावत् । भो वयस्य ! उपर्यपि वाचय ।

राजा — (वाचयति)

(क) सजळजळहरा वा उज्जळा विज्जुळा वा
सुरहिळमहुवाही केअईमारुओ वा ।
विरहिमहणकीळाकर्मठो वम्महो वा
सुहअ ! तुह कए मं णामसेसं कुणन्ति ॥ ३६ ॥

(सनिःश्वासास्रम्) सखे ! वैहासिक ! (इत्यर्धोक्तौ बाष्परुद्धकण्ठो विरमति ।)

विदूषकः — (सास्रं स्वगतम्) (ख) अवि णाम जाव कज्जसिद्धि से एस रसो केण वि रसन्तरेण अन्तरीअदु ।

(नेपथ्ये)

उत्तानीकृतभोगमण्डलचलज्जिह्वाकरालाकृति-
र्दंष्ट्राकोटिपरिस्रवद्विषकणश्रेणीनिषिक्तावनिः ।
वेत्रोद्दण्डितपाणिभिर्भयवशान्मुक्तान्तिको वेत्रिभिः
कष्टं कोऽपि महोरगः स्वयमसावन्तःपुरं गाहते ॥ ३७ ॥

राजा — (ससम्भ्रमम्) क्वासौ क्वासौ ।

विदूषकः — (सभयं राजानमालिङ्गन्) (ग) भो ! वअस्स ! दुट्ठविसहरजीहाजुअळन्तरपडिअं मं परित्ताआहि ।

(क) सजलजलधरा वोज्ज्वला विद्युतो वा
सुरभिलमधुवाही केतकीमारुतो वा ।
विरहिमथनक्रीडाकर्मठो मन्मथो वा
सुभग ! तव कृते मां नामशेषं कुर्वन्ति ॥

(ख) अपि नाम यावत्कार्यसिद्धिरस्य, एष रसः केनापि रसान्तरेणान्तरयतु ।

(ग) भो वयस्य ! दुष्टविषधरजिह्वायुगलान्तरपतितं मां परित्रायस्व ।

राजा — सखे! मा भैषीः। ननु नरेन्द्रोऽहं तव समीपे। तदेह्यन्तःपुरमेव प्रविशावः।

विदूषकः — (क) मा मा कालरूपकालकाकोदरकरालकाकोल-जलणिहिम्मि पडसु।

राजा — (विदूषकं हस्ते गृहीत्वा परिक्रामति।)

(पुनर्नेपथ्ये)

हा हा हता स्मः।

शूत्कारभीषणमुखः पवनाशनोऽयं
देवीमुपेत्य चरणे रभसाददाङ्क्षीत्।
एषा निपत्य भुवि विस्रंसितकेशपाशा
मूर्च्छामुपैति शनकैर्मुकुलीकृताक्षी॥ ३८॥

राजा — हा देवि! कलावति!। (इति मूर्छितः।)

विदूषकः—(ससम्भ्रमम्) (ख) समस्ससदु समस्ससदु वअस्सो। किं एदं। (विचिन्त्य विहस्य च, स्वगतम्) अहो मे पमादो। जेण केळिमालाए कहिदचरं जोईसरीए सिद्धिमदीए इन्दआळविज्जापत्थावं विसुमरिअ एत्तिअं काळं परिब्भन्तं। ता एसो एत्थ मुच्छन्दो चिट्ठउ। अहं तिस्से सहाअत्थं गमिस्सं। तदा कहिअं च केळिमाळाए 'तुवं तिस्से अणुऊळो होहि' त्ति।

(निष्क्रान्तः।)

(क) मा मा कालरूपकालकाकोदरकरालकाकोलजलनिधौ पततु।

(ख) समाश्वसतु समाश्वसतु वयस्यः। किमेतत्। अहो मे प्रमादः। येन केलिमालया कथितचरं योगीश्वर्याः सिद्धिमत्या इन्द्रजालविद्याप्रस्तावं विस्मृत्येतावत्कालं परिभ्रान्तम्। तस्मादेषोऽत्र मूर्च्छस्तिष्ठतु। अहं तस्याः सहायार्थं गमिष्यामि। तदा कथितं च केलिमालया 'त्वं तस्या अनुकूलो भव' इति।

राजा — (आश्वस्य)

दष्टा चेदणकभुजङ्गमेन देवी
कष्टं भो विफलमिदं हि जीवितं मे ।
कर्णाटक्षितिपतिकन्यकानुरक्तं
हे चेतो जहिहि शतं मनोरथानाम् ॥ ३९ ॥

(ततः प्रविशत्याहितुण्डिकवेषेण विदूषकः ।)

(विदूषकः) — (क)

आअड्ढणुच्चाडणतंतरूहं
वहामि तिक्खाण वि पण्णआणम् ।
वेकुंठपळ्ळङ्कमअं महाहिं
विद्दावएउं वि ण मे पआसो ॥ ४० ॥

(विचिन्त्य स्वगतम्) णमो बन्धुसिणेहस्स जस्स पहावेण एस वेहासिअबम्हणो इमं जुउच्छिअं वेसं गल्हाविओ । (पुरोऽवलोक्य) एदं अन्तेवुरदुवारं जाव पविसामि । (प्रविश्य) भो भद्दसिद्धी णाम जङ्गळि-अग्गेसरो ह्मि एत्थ सम्पत्तो ।

(नेपथ्ये)

साधु भद्रसिद्धे ! साधु । प्रीतिमुत्पादयसि नः । यतः —

त्वय्यभ्यर्णं गतवति सति क्रूरसर्पाभिदष्टा-
प्येषा देवी नयनयुगलं किञ्चिदुन्मीलयन्ती ।

(क) आकर्षणोच्चाटनतन्त्ररूपं वहामि तीक्ष्णानामपि पन्नगानाम् ।
वैकुण्ठपर्यङ्कमयं महाहिं विद्रावयितुमपि न मे प्रयासः ॥

नमो बन्धुस्नेहस्य यस्य प्रभावेणैष वैहासिकब्राह्मण इमं जुगुप्सितं वेषं ग्राहितः । इदमन्तःपुरद्वारं यावत् प्रविशामि । भो भद्रसिद्धिर्नाम जाङ्गलिका-ग्रेसरोऽस्म्यत्र सम्प्राप्तः ।

चित्रं चित्रं धरणिशयनादुत्थिता वीतखेदं
याति स्वैरं परिजनकरालम्बिनी वासगेहम् ॥ ४१ ॥

तदिह तिष्ठ । देव्यै भवदुपज्ञमिदमावेदयामि ।

विदूषकः—(स्वगतम्) (क) अहो इन्दआळवेअड्ठी जोईसरीए । मम उण वेसग्गहणमत्तो पआसो ।

राजा — (सर्वतोऽवलोक्य) हा कष्टम् । वैहासिकोऽपि क्व प्रस्थितवान् । भवतु अन्तःपुरमेव प्रविशामि । (परिक्रम्य प्रविशन् विलोक्य) अये ! को नु खल्वेषः —

आवीतमलिनवसनो दण्डाग्रग्रथितसर्पपेटीकः ।
अविरलशङ्खाभरणो मुखविलिखितरोचनातिलकः ॥ ४२ ॥

विदूषकः— (राजानं दृष्ट्वा, सशङ्कं स्वगतम्) (ख) हं अवि कदाइ एसो वअस्सो मं जाणिस्सिदि । अहव, जोईसरीए इन्दआळविज्जा मं रक्खदि ।

राजा — मद्र ! को भवान् ।

विदूषकः — (ग) भट्टा ! भद्दसिद्धी णाम आहितुण्डिओ । (इति प्रणमति ।)

राजा — (सहर्षमात्मगतम्) अ(पि) विषनिबर्हणप्रवीणा (ना ?आ)हितुण्डिकाः ।

(क) अहो इन्द्रजालवैदग्धी योगीश्वर्याः, मम पुनर्वेषग्रहणमात्रः प्रयासः ।

(ख) हम्, अपि कदाचिदेष वयस्यो मां ज्ञास्यति । अथवा योगीश्वर्या इन्द्रजालविद्या मां रक्षति ।

(ग) भर्तः ! भद्रसिद्धिर्नामाहितुण्डिकः ।

(नेपथ्ये)

भद्रसिद्धे ! इतस्तावत् ।

महतिः यं यत्कृतमात्मनस्त्वया
तदेतदाकर्ण्य सुपूर्णमन्मदा ।
इयं खलु त्वां नरपालवल्लभा
प्रतीक्षते कल्पितपारितोषिका ॥ ४३ ॥

राजा — (सप्रमोदं सस्नेहबहुमानञ्च) भद्र भद्रसिद्धे! अप्येवमिदम् ।

विदूषकः — (क) भट्टा! सव्वं दव्वविळसिदं ।

राजा — तदेहि, देवीं द्रक्ष्यावः ।

(उभावन्तःपुरप्रदेशं रूपयतः ।)

राजा — देवि !

यत्ते बालशिरीषनूतनदलस्पर्धालु मुग्धं वपुः
कष्टं दष्टमभूत्करालगरलज्वालेन कालाहिना ।
तेनानेन जनेन सुन्दरि! चिरं मूर्च्छायितं साम्प्रतं
शान्ते तत्र विषोष्मणि श्वसितमित्येतन्महत्कौतुकम्
॥ ४४ ॥

(आकाशे)

(ख) एव्वं हि समदुःखसुहो जणो होइ ।

विदूषकः — (ग) जेदु भट्टिणी ।

(क) भर्तः! सर्वं देवविलसितम् ।

(ख) एवं हि समदु खसुखो जनो भवति ।

(ग) जयतु भट्टिनी ।

(आकाशे)

(क) भद्द भद्दसिद्धे !

तुह सम्पइ पाणदायिणो
सरिसं किं पडिपज्जए मए*।
तह वि प्फुडमप्पकंखिअं
भण दिस्सं विहवस्स जं खमम् ॥ ४५ ॥

विदूषकः — (विचिन्त्य स्वगतम्) (ख) जोईसरीए भणिदं किळ मं विणिवेदिअ परितोसिअं पडिग्गहिदव्वं त्ति । दा एव्वं दाव । (प्रकाशम्) भट्टिणि! अवसरे कहइस्सं । तदा मे पडिपज्जसु ।

(आकाशे)

(ग) एव्वं होदु ।

विदूषकः—(घ) भट्टा! अणुमण्णेहि मं इमाणं सप्पाणं छुहापरिआराअ ।

राजा—एवमस्तु ।

(विदूषको निष्क्रान्तः ।)

(आकाशे)

(घ) महाराअं केण वि कज्जंतरेण को काळो मे दट्ठुकामाए ।

(क) भद्र भद्रसिद्धे!

तव सम्प्रति प्राणदायिनः सदृशं किं प्रतिपाद्यते मया ।
तथापि स्फुटमात्मकाङ्क्षितं भण दास्ये विभवस्य यत् क्षमम् ॥

(ख) योगीश्वर्या भणितं किल मां विनिवेद्य पारितोषिकं प्रतिग्रहीतव्यमिति । तस्मादेवं तावत् । भट्टिनि! अवसरे कथयिष्यामि । तदा मे प्रतिपाद्यताम् ।

(ग) एवं भवतु ।

(घ) भर्तः! अनुमन्यस्व मामेतेषां सर्पाणां क्षुधापरिहाराय ।

(ङ) महाराजं केनापि कार्यान्तरेण कः कालो मे द्रष्टुकामायाः ।

राजा — (स्वगतम्) अपि नाम प्रशान्तमन्युर्भवेदत्रभवती। (प्रकाशं) अनुगृहीतोऽस्मि।

(आकाशे)

(क) कन्दलिए! तं सुलोअं सुणावेहि महाराअं। जस्स चिरविआरिओ वि अह्मेहिं ण मुणिओ अभिहेओ।

राजा—(स्वगतम्) किन्नु खलु स्यात्। (प्रकाशम्) देवि! के वयं भवदनाकलिते बुद्धिं प्रवर्तयितुम्। तथापि शृणुमस्तावत्।

(आकाशे राअहंस मह पंकइणीत्यादि।)

राजा — (स्वगतम्) हन्त! तदेव बीजं, स एवाङ्कुरः। (प्रकाशम्) देवि! कृतमिमं दासजनं गम्भीरमुपालभ्य।

प्रहरसि मदिराक्षि! प्रेमभाजं किमेवं
जनमिममतिकोपक्रूरतारैरपाङ्गैः।
तव सुमुखि! सपेऽहं पादपङ्केरुहाभ्यां
यदि भवति मदीयं जातु चेतोऽन्यदास्थम्॥ ४६॥

(आकाशे)

(ख) कस्स एत्थ कोवो। सिविणो मं बाहेइ। ता अहं गमिस्सं।

राजा—कथं गतैव देवी। (सचिन्तं निःश्वस्य) एतावन्तं कालं भुजङ्गसम्भ्रमेणाक्षिप्तं मे मन इति लीलावतीमन्तरेणाधुना द्विगुणसंरम्भं प्रहरति मनसिशयः। (दन्ततालं दृष्ट्वा सखेदम्)

(क) कन्दलिके! तं श्लोकं श्रावय महाराजम्। यस्य चिरविचारितोऽप्यस्माभिर्न ज्ञातोऽभिधेयः।

(ख) कस्यात्र कोपः। स्वप्नो मां बाधते। तस्मादहं गमिष्यामि।

मदनशरधिकल्पे कर्णपाशे कुशाङ्ग्या
ननु पुनरपि याया मण्डनत्वं यदि त्वम् ।
कथय रहसि तस्याः कर्णजाहे मदीयं
मनसिशयशरालीपावके दावभावम् ॥ ४७ ॥

(प्रविश्य)

विदूषकः—(क) जेदु भवम् ।

राजा—सखे! वैहासिक! इयन्तं कालं क्व निलीनो भवान् यदिह महदत्याहितमभूत् तदत्रभवता न विदितमासीत् ।

विदूषकः—(स्वगतम्) (ख) दिट्ठिआ मम वेसपरिवत्तणं अत्त होदा ण किंपि जाणिअं । (प्रकाशम्) भो वअस्स! कस्स उण अत्तणो जीविअसंसए परकेरए अहिणिवेसो ।

राजा—(सस्मितम्) सखे तदिदं सर्वमास्तां तावत् ।

लोकत्रयप्रथितमोहनवस्तुमार्थैः
स्पृष्टं स्वयं भगवता मकरध्वजेन ।
तस्याः सखे! निरुपमं वदनारविन्दं
भूयः कदाचिदपि नाम विलोकयेयम् ॥ ४८ ॥

विदूषकः—(ग) को एत्थ संदेहो, जहिं असाहारणप्पआसो वेहासिअब्भणो ।

(नेपथ्ये)

क नु खलु महाराजः?
निशान्ते निद्राणा सपदि परिबुद्ध्य स्मितमुखी
सखीनामानन्दं मनसि जनयन्ती बहुगुणम् ।

(क) जयतु भवान् ।

(ख) दिष्ट्या मम वेषपरिवर्तनमत्रभवता न किमपि ज्ञातम् । भो वयस्य! कस्य पुनरात्मनो जीवितसंशये परकीयेऽभिनिवेशः ।

(ग) कोऽत्र सन्देहः, यत्रासाधारणप्रयासो वैहासिकब्राह्मणः ।

विशङ्कं पर्यङ्काभिभुतमवतीर्य स्वयमसौ
महाराजं क्वासौ दयित इति देवी मृगयते ॥ ४९ ॥

राजा—(श्रुत्वा) सखे! गच्छावस्तावत्।

विदूषकः—(क) गच्छदु भवं। अहं पुण अणुपदं आअच्छामि। जदो दुवेणं तीअत्तणं जुउच्छिदं होइ।

राजा—(सस्मितं विदूषकं हस्ते गृहीत्वा) अभिन्नो हि भवानस्मत्तः। (परिक्रामतः।)

(नेपथ्ये)

(ख) कहिं महाराओ।

राजा—(उपसृत्य) देवि! अयमस्मि।

(नेपथ्ये)

(ग) जेदु महाराओ। महाराअ! किंपि अब्भुददरं सुणावेमि महाराअं।

राजा—अनुगृहीतोऽस्मि।

(नेपथ्ये)

(संस्कृतमाश्रित्य) मया हि—

दृष्टः स्वप्ने फणिवलयिना पाणिना पाणिनालं
मन्दं मृद्नन्नचलदुहितुर्बालचन्द्रावतंसः।
पादन्यासप्रचलनवलद्भोगिनिश्वासवात-
क्षुभ्यद्गङ्गासलिलमुखरीभूतकोटीरभारः ॥ ५० ॥

(क) गच्छतु भवान्। अहं पुनरनुपदमागच्छामि, यतो द्वयोस्तृतीयत्वं जुगुप्सितं भवति।

(ख) क्वत्र महाराजः।

(ग) जयतु महाराजः। महाराज! किमप्यद्भुततरं श्रावयामि महाराजम्।

विदूषकः—(स्वगतम्) (ख) एसो सिद्धिमदीए इंदआळप्पबन्धस्स उवसंहारकव्वबन्धो त्ति तक्केमि ।

राजा—(सविस्मयम्) आश्चर्यमाश्चर्यम्। ततस्ततः ।

(नेपथ्ये)

(संस्कृतमाश्रित्य) एवमभिहितास्मि स्मरशासनेन—

"वत्से कलावति! सरीसृपदूषिता त्व-
मद्याहितुण्डिकमिषेण मयैव गुप्ता ।
तत्पारितोषिकमतो वितराश्रुतं मे
येनायमृद्धिमुपयास्यति वीरपालः" ॥ ५१ ॥

राजा—(साशंसं स्वगतम्) अपि नाम लीलावतीमेव प्रार्थयेत भगवान्नत्रभवतीमस्मदर्थे । (प्रकाशम्) ततस्ततः ।

(नेपथ्ये)

"लीलावतीं नृपसुते! वितराशु भर्त्रे
येनायमद्य हि भविष्यति चक्रवर्ती ।
श्रेयो मुधा खलु जहासि करप्रतिष्ठं
यच्चक्रवर्तिमहिषीपदपद्धतिस्ते" ॥ ५२ ॥

(क) एव्वं भणिअ तिरोभूदो भअवंतो गोरीणाहो। ता एदु महाराओ लीळावदीपाणिग्गहणमंगळं अणुहोदुम्। कुदो पंकइणिं विणा राअहंसस्स णिव्वुदी ।

राजा — (सलज्जं) यदादिशति देवी । (जनान्तिकम्) वयस्य! किमत्र विधेयम् ।

(क) एष सिद्धिमत्या इन्द्रजालप्रबन्धस्योपसंहारकाव्यबन्ध इति तर्कयामि।

(ख) एवं भणित्वा तिरोभूतो भगवान् गौरीनाथः । तदेतु महाराजो लीलावतीपाणिग्रहणमङ्गलमनुभवितुम् । कुतः पङ्कजिनीं विना राजहंसस्य निर्वृतिः।

विदूषकः — (जनान्तिकम्) (क) किं एसो संदेहकालो । आमन्तिदो को मिट्ठभोअणं परिच्चेदि ।

राजा — एवमस्तु । (सानन्दं निष्क्रान्तः ।)

विदूषकः— (सहर्षम्) (ख) फलिदं मे पआसेण सिद्धिमदीए अ ।

(नेपथ्ये)

पाटीरद्रवपङ्किलैः करतलैर्नीलाश्मभित्तिस्थले
लीलावेश्मसु कल्प्यतामविरलं पद्माङ्कुलानां ततिः ।
लिख्यन्तां मणिपुत्रिकाकुचतटे पत्राङ्कुराः कुङ्कुमैः
रज्यन्तां रजनीरजोभिरजिरालिन्दप्रतोली भुवः ॥ ५३ ॥

विदूषकः — (सभ्रमोदम्) (ग) अम्महे ! पिअवअस्सस्स लीलावदीपाणिग्गहणमङ्गलवइअरो उग्घोसीअदि । दाणिं णिव्वुत्तेण विवाहूसवेण होदव्वं ।

(नेपथ्ये)

प्रिये लीलावति !

सोढश्चिरं मदनबाणगणावलेपः
कालश्च नीलजलदावलिदुर्निरीक्षः ।
यस्याः कृते तव कथञ्चन चञ्चलाक्षि !
लब्धा मयासि सुकृतोपचयेन सेयम् ॥ ५४ ॥

(क) किमेष सन्देहकालः , आमन्त्रितः को मिष्टभोजनं परित्यजति ।

(ख) फलितं मे प्रयासेन सिद्धिमत्याश्च ।

(ग) अम्महे प्रियवयस्यस्य लीलावतीपाणिग्रहणमङ्गलव्यतिकर उद्घोष्यते । इदानीं निर्वृत्तेन विवाहोत्सवेन भवितव्यम् ।

विदूषकः — (क) अम्महे ! आणंदमंथरं पिअवअस्सो एस णवोढं पिअं उवच्छन्देदि ।

(नेपथ्ये)

कल्याणिनि ! तत् केलिमालाद्वितीया मङ्गलदेवताराधनाय तदायतनं प्रति प्रतिष्ठस्व । अहमप्यनुपदमेव वयस्येन सहागच्छामि ।

विदूषकः — (सहर्षम्) (ख) मम उण मङ्गळदेवदाराहणोपक्कमे सोत्थिवाअणाणिमित्तं तहिं पडिग्गहेण होदव्वं ।

(नेपथ्ये कलकलः ।)

विदूषकः — (ससम्भ्रमम्) (घ) हा किं एदं भविस्सिदि ।

(पुनर्नेपथ्ये)

कर्णाटे दृढमत्सरेण मनसा जागर्ति यः प्रत्यहं
मित्रं तस्य बली कलिङ्गनृपतेस्ताम्राक्षनामासुरः ।
मायाकर्मणि लम्पटः प्रियसखीमात्रानुयात्रामसौ
कष्टं कर्षति कैशिके गतघृणो लीलावतीं लीलया ॥ ५५ ॥

विदूषकः — (सभयकम्पं) (ग) अविहा अविहा ।

(नेपथ्ये)

तिष्ठ तिष्ठ पापासुर ! तिष्ठ ।
सुस्निग्धे पेलवालीकरजाविरचिते केशपाशे कृशाङ्ग्या-
स्तत्रोद्यं कराग्रं सपदि निदधतः कालदण्डोपमानम् ।

(घ) अम्महे, आनन्दमन्थरां प्रियवयस्य एष नवोढां प्रियामुपच्छन्दयति ।

(क) मम पुनर्मङ्गलदेवताराधनोपक्रमे स्वस्तिवाचननिमित्तं तत्र प्रतिग्रहेण भवितव्यम् ।

(ख) हा किमेतद् भविष्यति ।

(ग) अविधा अविधा ।

क्रूरक्रेङ्कारतारे धनुषि कृतपदस्सायको मापकीन-
श्चण्डस्ते कण्ठपीठीं मृदुतरकदलीकाण्डलावं लुनातु ॥ ५६ ॥

विदूषकः — (क) दिट्ठिआ कुविदो मे पिअवअस्सो । किंदु माआअं वि किं पवट्टेइ से पआवाणळो ।

(पुनर्नेपथ्ये)

जातं जातमवलम्बनम् ।

गतासुमसुराधमं सरभसं विधाय स्वयं
शरेण करपल्लवे च परिगृह्य लीलावतीम् ।
अयं निविशते शनैर्बहलहर्षमन्तःपुरं
प्रसन्नवदनाम्बुजस्स खलु वीरपालो नृपः ॥ ५७ ॥

विदूषकः — (ख) जिअं जिअं अह्मेहिं ।

(ततः प्रविशति राजा ।)

राजा — (सविमर्शम्)

गोष्ठी सा विरला न यत्र घटते सत्ता पुरोभागिनां
नारी सा खलु दुर्लभा न कुसृतिश्लिष्टं यदीयं मनः ।
दुष्प्रापं च तदम्बु तीरजरजोराजिर्न यद् दूषयेद्
दुस्साधश्च सुखं तदाविलयते दुःखानुवृत्तिर्न यत् ॥ ५८ ॥

विपदूकः — (उपसृत्य) (ग) सोत्थि वड्ढदु भवं लीलावदी-वल्लहो महीअळचक्कवट्टी महाराओ ।

(क) दिष्ट्या कुपितो मे प्रियवयस्यः । किन्तु मायायामपि किं प्रवर्ततेऽस्य प्रतापानलः ।

(ख) जितं जितमस्माभिः ।

(ग) स्वस्ति वर्धतां भवान् लीलावतीवल्लभो महीतलचक्रवर्त्ती महाराजः ।

राजा — सखे ! भवत्प्रयत्नेन फलितमिदानीम् । पश्य—

दोर्भ्यामेव सनक्रचक्रजटिलं वाराम्निधिं सन्तरेत्
पद्भ्यामेव स लङ्घयेदपगतालम्बं नभोमण्डलम् ।
दुस्साधाखिलकर्मसाधनविधौ पाण्डित्यमत्यूर्जितं
बिभ्राणा सुहृदां कटाक्षलहरी जागर्ति यस्योदये ॥ ५९ ॥

विदूषकः — (क) भो वअस्स ! ण मम एक्कस्स वेहासिअबम्हणस्स एसो पआसो ।

राजा — सखे कस्यापरस्यापि ।

विदूषकः — (ख) एव्वं विअ ।

राजा — (सविस्मयं सहर्षञ्च) अहो महाप्रभावा सा योगिनी सिद्धिमती नाम । अशक्यनिष्क्रयोऽयमस्या अस्मिञ्जनेऽनुग्रहः । अथवा—

निर्व्याजनिर्मलधियां विधुरेषु मन्ये
वीतामिसन्धिकणिकः करुणानुषङ्गः ।
किं चातका विदधते हितमम्बुदेभ्यः
किं तर्पयन्ति न पयोभिरमून् पयोदाः ॥ ६० ॥

विदूषकः — (ग) भो वअस्स ! किं तुह अवरं पिअं उवहरदु सिद्धिमदी ।

राजा — सखे ! किमतः परं प्रियमस्ति । पश्य । तया त्वया च

देवी मय्यनुकूलभावमधुरोदर्कं मनो लम्भिता
मह्यं सम्प्रति दापितेयमनया कर्णाटराजात्मजा ।
ताम्राक्षो विनिपातितो ननु भवान् जागर्ति कृत्येषु मे
सङ्क्रान्ता मयि चक्रवर्तिपदवी भूयः किमाशास्यते ॥ ६१

(क) भो वयस्य ! न ममैकस्य वैहासिकब्राह्मणस्य एष प्रयासः ।

(ख) एवमिव ।

(ग) भो वयस्य ! किं तवापरं प्रियमुपहरतु सिद्धिमती ।

तथापीदमस्तु—

(भरतवाक्यम्)

काव्ये नव्यपुराणभेदगणनाहीना धियो धीमतां
सद्गृह्णन्तु गुणानणूनपि तथा दोषानपाकुर्वताम् ।
लोकानामवधूतमत्सरकथामैत्री तथोज्जृम्भतां
भक्तिर्नाथिरमेधतां गुरुपदाम्भोजे जगन्मङ्गले ॥ ६२ ॥

(इति परिक्रम्य निष्क्रान्तौ ।)

लीलावती नाम वीथी संपूर्णा ॥

शुभमस्तु ॥

श्रीनारायणभट्टपादगुरुपादेभ्यो नमः ॥

श्लोकानुक्रमणिका ।

	पृष्ठम्	श्लोकः
अपि खलु कुशलं मे	११	३२
अभिनवपदबन्ध०	१	२
आअड्ढणुच्चाडण०	१९	४०
आरूढप्रणया चिराय	१२	२६
आवीतमलिनवसनो	२०	३२
उत्तानीकृतभोग	१७	३७
एते नूतन०	१०	१८
कण्णाडराओ	७	१४
कर्णाटे दृढमत्सरेण मनसा	२८	५५
कालोऽयं खलु	१५	३१
काव्ये नव्यपुराण०	३०	६२
किमपि चपलं जानन्त्या	११	२५
गतासुमसुराधमम्	२९	५७
गम्भीरनीरदमृदङ्ग०	३	६
गहिरपओहर०	११	२३
गाथेयं मधुरपद०	१३	१८
गुरुअरविरहुक्कण्ठम्	३	७
गोष्ठी सा विरला	२९	५८
घर्मक्लान्तपलाश०	१६	३४
चतुर्मुखमुखाम्भोज०	३	४
चलत्कलापम्	१६	३५
जहिट्ठमट्ठारहवेअवेदी	४	१०
तङ्कारो नु जिगीषतः	१३	३२
तेपादपद्मयुगलम्	१	१
तुह सम्पइ	२२	४५
त्वय्यभ्यर्णं गतवति	१९	४१
दग्धा चेदणकसुजङ्गमेन	,,	३९
दिग्गजनासूढपयोधरासु	१६	३३
दृष्टः स्वप्ने फणिवलयिना	२५	५०
देवी मय्यनुकूल०	३०	६१
दोर्भ्यामेव सनक्रचक्र०	,,	५८
नवकुवलयदाम०	११	२४
न स्नाने न च भोजने	६	११
नित्यं नृत्यति यस्य	३	५
निर्व्याजनिर्मलधियाम्	३०	६०
निशान्ते निद्राणा सपदि	२४	४९
पाटीरद्रवपङ्किलैः	२७	५३
प्रहरसि मदिराक्षि	२३	४६
बाणा जस्स	८	१५
बाणान् संहर पञ्चबाण!	९	१७
मदनशरधिकल्पे	२४	४७
मन्दवातविलुलीकृत०	१०	२०
मम नयनयोरातिथ्यम्	१५	३०
मम रणरणिकां	१०	२१
महत्प्रियं यत्कृतमात्मनः	२१	४३
यत्ते बालशिरीष०	,,	४४
रहयति महामोह०	४	९
राअहंस मह	१२	२७

	पृष्ठम्	श्लोकः		पृष्ठम्	श्लोकः
लीलावतीं नृपसुते	२६	५२	शूत्कारभीषणमुखः	१८	३८
लोकत्रयप्रथित०	२४	४८	श्रयति गरलच्छायम्	६	१२
वत्से कलावति !	२६	५१	सजळजळहरा वा	१७	३६
वन्दस्व सुन्दरि !	२	३	सुन्दरि तव गीतिरियम्	३	८
बिकचकुटचमल्ली०	६	१३	सुस्निग्धे पेलव०	२८	५६
विरहदहणवेअ०	९	१६	सोढश्चिरं मदनबाण०	२७	५४
वेणीलतादरतिरोहित०	१०	१९	हृदय स्वस्ति भवते	१५	२९